This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M २१७५ विषय पूजाविधी

नाव श्रीकृष्णाचे विधीम (mss)

लेखक / लिपीकार —

पृठ 27 काळ — पूर्ण ✓ / ~~अपूर्ण~~

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१

श्रीगणेशायनमः॥श्रीलक्ष्मीनृसिंहायनमः॥[illegible]च
स्यगुणमीशानं स्तुलं विघ्नकुलांतकं॥नृकुंजरतनुं वंदे
वंदारुजनवत्सलं॥१॥यदिच्छावशतो विश्वमुत्पत्तिस्थि
ति संहृती॥या तिसाऽवयति श्रीमत्रिपुरारिकुटुंबि
नी॥२॥उत्तरानंदनाथश्रीपादयुग्मप्रभावतः॥कृष्णा
६न र्चे विधिं वक्ष्ये यथामति यथाक्रमं॥३॥तत्रादौ साधकें
द्रो ब्राह्ममुहूर्ते चोत्थायावश्यकं कृत्वा शत्रिवाससी
स्कान्चे वाससी परिधायाचम्य मनसा शुचिर्भूत्वाम्र
दासने समुपविश्य स्वशिरसि सहस्रदलपाठोपरि १

निजगुरुं ध्यायेत्॥यथा॥सहस्रदलपंकजे सकलशी
तरश्मिप्रभं वराभयकरांबुजं विमलगंधपुष्पांबरं॥
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं स्मरामि शि
रसि स्थितं तदभिधानपूर्वं गुरुं॥३॥इति ध्यात्वा तच्चर
णारविंदानि स्वधारयात्म देहमभिषिक्तं मत्वा संघृष्टमु
द्रया शिरसि श्रीगुरुपादुकां न्यसेत्॥ॐ ऐं ह्रीं श्रीं ह्स्ख्फ्रें
हसक्षमलवरयूं सहक्षमलवरयीं ह्सौः अमुकानंदनो
थामुके शाक्त्यंबा श्रीपरपादुकां पूजयामि नमः इ
ति गुरुपादुकां विन्यस्य मानसोपचारैः पूजयेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो२॥

यथागुरुपादुकाभ्यांनमः॥लंपृथ्वीतत्वात्मकं॰[illegible]न्धं
ल्पयामिनमइसंगुष्ठेनकनिष्ठास्यशेल॥१॥गुरुपा॰
हमाकाशतत्वात्मकंपुष्पं॰वौषड्इतितर्जनीमंगुष्ठे॰॥२॥
गुरु॰यंवायुतत्वात्मकंधूपं॰मध्यमयांगुष्ठे॰॥३॥गुरु॰
वमग्नितत्वात्मकंनैवेद्यंक॰स्तुध्याहस्तनामिकयांगुष्ठे॰॥४॥
गुरु॰संसर्वतत्वात्मकंतांबूलं॰इतिसर्वांगुलीभिः॥त
तोयोनिमुद्रयाप्रणम्यगुरुपादुकामंत्रंयथाशक्त्याप्र
जप्यवक्ष्यमाणरूपंनिवेदनमंत्रेणजपंनिवेद्यश्रीगु
रुश्रीकृष्णाद्वयंध्यायनगुरुस्तोत्रंसुदीरयेत्॥यथा॥
नमस्तेनाथभगवान्कृष्णायगुरुरूपिणे॥विद्याव

गो२॥

तारसंसिध्यैस्वीकृतानेकविग्रह॥१॥नवायनवरूपाय
परमार्थैकरूपिणे॥सर्वज्ञानतमोभेदभानवेचिद्घनायते॥२॥
स्वतंत्रायदयाकॢप्तविग्रहायचिदात्मने॥परतंत्रायभक्ता
नांभव्यानांभव्यरूपिणे॥विवेकिनांविवेकायविमर्शाय
विमर्शिनां॥प्रकाशानांप्रकाशायज्ञानिनांज्ञानरूपिणे॥४॥
पुरस्तात्पार्श्वयोःपृष्ठेनमस्कुर्यामुपर्यधः॥सदामच्चि
त्तरूपेणविधेहिभवदासनं॥५॥इतिस्तुत्वाव्यापकत्वे
नभावयेदितिगुरुपूजाविधिः॥ततोमूलाधारादिब्रह्म
रंध्रांतंश्रीकृष्णरूपिणींप्रसुप्तभुजगाकारांकुंडलि
नीविचिंतयेत्तांयथा॥उद्यद्दिवाकरोद्योतांयावत्प्राप्तं
ष्टजासनः॥अशेषाशुभशांत्यर्थंसमाहित[illegible]श्रि

॥३॥

६॥ तत्र भापटलव्याप्तं स्वदेहं परिचिंतयेत् ॥१॥ इति ...
नीं ध्यात्वा वक्ष्यमाणश्रूष्यादिकान्यस्य सा स्वहृदये पयथोक्ते श्री
कृष्णं ध्यात्वा पूर्वोक्तैर्मीनसोपचारैः संपूज्य मूलं यथाशक्ति
जप्त्वा निवेद्य ॥ श्रीगुरुदेवतात्मनामैक्यं मत्वा देवस्तोत्र
मुदीरयेत् ॥ यथा ॥ प्रातः स्मरामि कमनीयपदारविंदं श्री
देवकीतनयमिंदुमुखं मुकुंदं ॥ नीलांबुदाभमरुणारुणपा
णिपद्मं नेत्रप्रभालवविलिर स्फुटनीलपद्मं ॥१॥ प्रातः स्म
रामि शकटत्तृणप्रलनारिं दामोदरं विसृतारूपमगा
रिं ॥ बिंबाधरं स्मुरदशाननवनीचोरं गोपालबालकसखं त ४
हृतभूमिभारं ॥२॥ प्रातः स्मरामि कृतमंजुलवेणुनादं
वृंदावने परिविमोहितधेनुवृंदं ॥ गोपांगणप्रगटित
प्रियजारभावं कंसादिसंघपरिपूरितवैरभावं ॥३॥ ॥३॥

प्रातः स्मरामि निगमागमगीतकीर्तिं कृष्णं स्वगात्रलवनि
र्जितकाममूर्तिं ॥ राधावरं सुरवरं यदुवंशवीरं भक्तप्रियं
मुरहरं सुरुषप्रवीरं ॥४॥ प्रातः स्मरामि शिखिबर्हकलावतं
संपीतांबरं सुतिलकं कमनीयहासं ॥ नानाविधाद्युतिविभू
षणशोभितांगं श्रीरुक्मिणीरतिपरं भवभीतिभंगं ॥५॥ यः
श्लोकपंचकमिदं प्रातर्निसंपठेन्नरः ॥ तस्मै श्रीसत्यभामे
शः सर्वकामप्रदो भवेत् ॥६॥ एवं स्तुत्वानंदस्तुं निजक
सं निवेदयेत् ॥ प्रातः प्रभृति सायांतं सायादि प्रातरंततः ॥ ७॥
यत्करोमि रमानाथ तत्सर्वं तव पूजनं ॥ इति संप्रार्थ्यावश्य
कार्यार्थमाज्ञां प्रार्थयेत् ॥ यथा ॥ गोविंद गोपाल सुख
स्वरूप श्रीकृष्ण विष्णो भवदाज्ञयैव ॥ प्रात... स्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतवजिपार्थसंसारस्याग्रामनुवर्त्तयिष्ये॥ [illegible]॥ स[illegible]स्या
ग्रामनुवर्तमानेन दाशयाकंसहरामरेश॥ स्पष्टोतिर
स्कारकलिप्रमादभवानिमामाभिभवतुविष्णो॥ [illegible]॥ जा
नामिधर्मनचमेप्रवृत्तिर्जानाम्यधर्मनचमेनिवृत्तिः॥
त्वयाहृषीकेशहृदिस्थितेनयथानियुक्तोस्मितथाकरो
मि॥३॥ ईसाक्षोगृहीत्वागुरुपदेशेन शीलंसहृत्रुसि
द्धमजपाजपनिवेदयेत्॥ भूमिप्रार्थना॥ समुद्रमेख
लेदेविपर्वतस्तनमंडले॥ विष्णुपत्निनमस्तुभ्यंपाद
स्पर्शंक्षमस्वमे॥ इतिभूमिप्रार्थ्यश्वासानुसारेणभू
१५॥ मौपादंनियम्यगृहाद्बहिर्गच्छेत्॥ इतिप्रातर्निष्क्रम

णविधिः॥ ततोयथाविधिविहितदिनेषुविहितकाष्ठेन २
ॐ क्लींकामदेवायसर्वजनप्रियायनमः इतिमंत्रेणद
तान्विशोधयेत्॥ इतिदंतधावनं॥ मलेनमुखप्रक्षाल
येदितिमुखप्रक्षालनं॥ ततः आभ्यंतरस्नानंकुर्यात्॥ कोटिसूर्य
प्रतीकाशंनिजभूषासुधेष्टितं॥ शिरस्थंसंस्मरेदेवंतस्यादेप
कधारया॥१॥ विशंत्याब्रह्मरंध्रेण निजदेहंविशुद्धया॥ अंतः
स्थांतर्गतंपापंविरजोजायतेनरः॥२॥ एवंकृत्वांतरस्नानंततो
बाह्यंसमाचरेत्॥ इत्याभ्यंतरस्नानं॥ ततः शुचिराचांतः श्री
कृष्णकृपायेत्तोगृहीतस्नानसंभारानयाचेगत्वास्त्रमंत्रेण
तीरंप्रक्षाल्यस्नानसंभारांस्तत्रनिधायस्वशास्त्रोक्तप्रकारेण
स्नात्वामंत्रस्नानंकुर्यात्॥ यथा॥ गुरुगणप्रतिष्ठदेवतानुत्वाम
लेनप्राणानायम्यदेशकालादिसंकीर्त्य [illegible]

॥८॥

श्रीकृष्णप्रीत्यर्थं तां त्रिकृत्स्नानं करिष्ये ॥ इति संकल्प्य [illegible] तोह
स्तमात्रं चतुरस्रं तीर्थं परिकल्प्य ॥ ॐ अस्मां जो हरती यो निक
रैः स्पष्टानि तिरवे ॥ तेन सत्येन मे देवतीर्थं देहि दिवाकर ॥१॥ गं
गे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधु कावेरि जलेऽस्मि
न् सन्निधिं कुरु ॥२॥ आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि ॥ ए
हि गंगे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥३॥ इति मंत्रान्पठित्वा वमि
ति बीजेन तानि जले योजयित्वा तत्र अग्न्यर्कचंद्रमंडलानि संचिं
त्य वमित्यमृतबीजेन तज्जलं सप्तवारमभिमंत्र्य हुमित्यव
गुंठनमुद्रयावगुंठ्य फडिति संरक्ष्य मूलेनैकादशवारमभिमं
त्र्य तत्र वक्ष्यमाण चक्रस्थं सावरणं श्रीकृष्णं ध्यात्वा तं मूलेन स्ना
पयित्वा तच्चरणनिःसृतं जलं मत्वा ॥ तज्जलेन देवतां स्मरन् ॥
आधारः सर्वभूतानां विष्णोरतुलतेजसः ॥ त्रिर्निमज्यो ॥८॥

त्स्यकुलपात्रमुद्रया मूलेन सप्तवारं शिरः प्रोक्ष्य सिसृक्षोर्नि
खिलविश्वं मुखः शुक्रप्रजापते ॥ मातरः सर्वभूतानामापो दे
व्यः पुनंतु मां ॥ अलक्ष्मीमलरूपा या सर्वभूतेषु संस्थिता ॥ क्षाल
यंती निजस्पर्शादापो देव्यः पुनंतु मां ॥२॥ यन्मे केशेषु दौर्भाग्यं सी
मंते यच्च मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु वो नमः ॥३॥
आयुरारोग्यमैश्वर्यमरिपक्षक्षयं सुखं ॥ संतोषः क्षांतिरास्ति
क्यं विद्या भवतु वो नमः ॥४॥ इति सर्वांगमभिषिंच्याघमर्षणं कु
र्यात् ॥ यथा वामहस्ते जलं गृहीत्वा मूलेन त्रिरभिमंत्र्य दक्षह
स्तेनांगुष्ठानामिकायोगेन मूलेनैव त्रिर्मूर्ध्नि नमाभिषिंच्याव
शिष्टं जलं पुनर्दक्षिणहस्ते गृहीत्वा तेजोरूपं ध्यात्वा इडया
तः समाकृष्य तेन क्षालितपापसंचयं कृष्णवर्णं विचिंत्य पिंगला
या विरेच्य स्ववामे कल्पित वज्रशिलायां ॐ अस्त्रा[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥

कुंफडिति मंत्रेण मूलेनवास्फाल्ये दिसख्यमर्षणं॥ ततः देवर्षि
सोत्याचम्य जलतर्पणं कुर्वीत॥ यथा ब्रह्मादयो देवास्तृप्यंतु
उपवीतं कृत्वा सनकादयो मनुष्यास्तृप्यंतु॥ अपसव्यं कृत्वा कव्य
वाहनादयः पितरस्तृप्यंतु॥ तर्पणांते अस्मत्पितरस्तृप्यंतु॥ गुरु
वस्तृप्यंतु॥ पुनराचम्य इति जलतर्पणं॥ ततस्तीरमागत्य वस्त्रं
संपीड्य मूलेनाभ्युक्षिते शुद्धे वाससी परिधारयेत्॥ ततः आ
चम्यासने स्थित्वा तिलकं कुर्यात्॥ आचमनं यथा॥ केशवाय
स्वाहा॥ ॐ नारायणाय॰ ॐ माधवाय॰ इति त्रिर्जलमाचम
य्य॥ गोविंदाय॰ विष्णवे॰ इति करौ प्रक्षाल्य॥ मधुसूदना॰
त्रिविक्रमाय॰ इति द्वावोष्ठौ प्रक्षाल्य॥ वामनाय॰ श्रीधराय॰ इति मु
खं॰ हृषीकेशाय॰ इति हस्तौ॰ पद्मनाभाय॰ इति चरणौ॰ दा
मोदराय॰ इति शिरः॥ संकर्षणाय॰ इति अंगुष्ठप्रदेशिनीभ्यां
मुखं स्पृशेत्॥ वासुदेवाय॰ प्रद्युम्नाय॰ इत्यंगुष्ठानामिकाभ्यां ॥५॥

नासापुटे॥ अनिरुद्धाय॰ पुरुषोत्तमाय॰ इत्यंगुष्ठकनिष्ठिकाभ्यां नेत्र
योः॥ अधोक्षजाय॰ नारसिंहाय॰ इति तथैव कर्णयोः॥ अच्युताय॰
इत्यंगुष्ठकनिष्ठिकाभ्यां नाभिं॥ जनार्दनाय॰ इति करतलेन हृदयं॥
उपेंद्राय॰ इति सर्वाभिरंगुलीभिः शिरः॥ हरये॰ इति तथैव वा
मांसे॥ कृष्णाय॰ तथैव दक्षांसे॥ इति विष्णवाचमनं विधाय तिल
कधारणं कुर्यात्॥ यथा॥ गोपीचंदनं मूलेनाभिमंत्र्यानामिका
मध्यमांगुष्ठतर्जनीनामेकतमया स्वकामनावशात् ललाटा
दिषु द्वादशपुंड्रान् तत्तन्नामभिर्धारयेत्॥ यथा केशवाय॰
ललाटे॥ नारायणाय॰ उदरे॥ माधवाय॰ वक्षसि॥ गोविं
दाय॰ कंठे॥ विष्णवे॰ दक्षिणकुक्षौ॥ मधुसूदनाय॰
बाहौ॥ त्रिविक्रमाय॰ कंधरे॥ वामनाय॰ वामकुक्षौ॥
पद्मनाभाय॰ पृष्ठे॥ दामोदराय॰ त्रिके॥ वासुदेवाय॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।८।।

मूर्ध्नि ॥ एवमूर्ध्वपुंड्रं निधाय स्वर्णादिनिर्मिताभिर्गदादिमुद्रा
भिरुक्तस्थानेषु मुद्राधारणं कुर्यात् ॥ अष्टाक्षरं द्वादशाक्षरं
वा समुच्चरन् ललाटे गदां कुर्यात् ॥ हृदये च चक्रं दक्षिणभुजे
चक्रं सव्ये शंखं वा मूर्ध्नि शार्ङ्गचापौ ॥ इति तिलकधारणं ॥ ततः
तुलस्यादिमालाधारणं कृत्वा वैदिकीं संध्यां विधाय तांत्रिकी
मारभेत् ॥ यथा ॥ मूलेन शिखां बध्वा गुरुवंदनपूर्वकं मूले
न प्राणायामत्रयं विधाय ऋष्यादिषडंगानि कृत्वा सूर्यमंडले
यथोक्तं श्रीकृष्णमूर्तिं ध्यात्वा स्वपुरतः गंगे चेति मंत्रेण क्रो
मिसंकुशामुद्रया सवितृमंडलतीर्थान्यावाह्य धेनुमुद्रया
तज्जलममृतीकृत्य तत्र वक्ष्यमाणलक्षणं श्रीकृष्णयंत्रं
विलिख्य मूलेन त्रिरभिमंत्र्य तेनोदकेन पूर्ववदाचम्य
श्रीकृष्णरूपी कृष्णप्रीत्यै प्रातः संध्यां करिष्ये ॥ इति संक ।।८।।

ल्प्य ॥ वामहस्ते जलं गृहीत्वा दक्षांगुष्ठानामिकाभ्यां वामहस्त
रंध्रनिर्गतजलेन मूलं स्मरन् ॥ त्रिः शिरः प्रोक्ष्यावशिष्ट
जलं पुनर्दक्षिणहस्ते गृहीत्वा इडयांतः समाकृष्य तत्रो
तैः पापसंचयैः कृष्णरूपं ध्यात्वा पिंगलया विरेच्य पूर्वव
दास्फाल्याचम्य सूर्यमंडलस्थाय श्रीकृष्णायार्घ्यं दद्या
त् ॥ यथा ॥ तज्जलमादाय अक्षतादिनिक्षिप्य स्मरन् ४ ह्रीं
हंसः रविमंडलसंस्थाय कृष्णाय अर्घ्यं कल्पयामीति
त्रिवारमर्घ्यं दत्वा तत्रार्कमंडले पुनः कृष्णं ध्यात्वा गा
यत्रीं मूलं वाष्टोत्तरशतं तदर्धं तदर्धं वा जपेत् ॥ गाय
त्रीमाह ॥ नारायणाय विद्महे वासुदेवाय धीमहि ॥
तन्नः कृष्णः प्रचोदयात् ॥ इति जप्त्वा गायत्रीं मूलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽर्घ्यं श्रीवृक्षं तर्पयामीति जपसंस्मंतर्यामिकं लोकपालं
श्चनत्वा तीर्थमर्कमंडले विसर्ज्य संहारमुद्रयात्मस्वहृदि
देवतां विसर्ज्य पुनराचमेदिति प्रातःसंध्यानमध्यान्हसा
यंसंध्ययोः संकल्पे उक्तभेदः अन्यसर्वं समानमिति मध्या
न्हसायंसंध्योः संध्यालोपे प्रायश्चित्तश्रवणात्संध्यात्रयमव
श्यं ततस्तीर्थं नमस्कृत्य गृहीतजलपात्रः स्तोत्रादि पठन्॥
पूजास्थानं गत्वा प्रक्षालितचरणश्चाचांतः पूजागृहद्वारि
स्थित्वा ॐ सूर्यः सोमो यमः कालो महाभूतानि पंच च॥ एते
शुभाशुभस्येह कर्मणो तव साक्षिणः इति पठित्वा द्वारार्घ्यं कुर्या
त्॥ यथा॥ तत्र त्रिकोणमंडलं विलिख्य गंधादिभिः संपूज्य तं
त्राधारं प्रतिष्ठाप्य ॐ फट् द्वारार्घ्यं साधयामि॥ इत्यस्त्रा
य फडिति पात्रं प्रक्षाल्य तदाधारं संस्थाप्य तत्र नम इति जलं ॥८॥

मापूर्य गंगे चेति मंत्रेणांकुशमुद्रया सवितृमंडलत
स्तीर्थान्यावाह्य धेनुमुद्रयामृतीकृत्य मिति गंधादि निक्षि
प्य मूलेनाभिमंत्र्य तेनोदकेन द्वारं प्रोक्ष्य श्रीवृक्षमंडपा
य नमः इति संपूज्य प्रणम्य द्वारपूजामारभेत्॥ यथा॥ ॐ ऊर्ध्वे
गणपतये नमः॥ दक्षिणे महालक्ष्म्यै॰ वामे सरस्वत्यै॰
पुनर्दक्षिणे विघ्नाय॰ गंगायै॰ यमुनायै॰ पुनर्वामे॥
क्षेत्रपालाय॰ गंगायै॰ यमुनायै॰ पुनर्दक्षे धात्रे॰
वामे विधात्रे॰ पुनर्दक्षिणे शंखनिधये॰ पुनर्वामे
पद्मनिधये॰ ॐ द्वारश्रियै॰ देहल्यां वास्तुपुरुषाय॰
इति मंडपाभ्यंतरे॥ एवं संपूज्य द्वारपालान्पूजयेत्॥ ॐ
नंदाय॰ सुनंदाय॰ चंडाय॰ प्रचंडाय॰ बलाय॰ प्रब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥

लाय॰ भद्राय॰ सुभद्राय॰ इति द्वारपालो देहलीमंडपाभ्यं
तरे विहायकु(?)कस्थानेषु यथासंख्येन संकेत्या(?)॥ इति
द्वारपूजा॥ ततः वामांगं संकोचयन् वामशाखास्पृशन् वामं
घ्रिणा ततः प्रविश्य ॐ ह्रीं आधारशक्तिकमलासनाय नमः॥
अंतर्मातृका बहिर्मातृकां कृत्वा॥ अथ स्थितिमातृकान्यासः॥
स्थितिन्यासे विश्वपालिनी देवताह्रस्याकु(?)ः अन्यत्पूर्ववत्॥
अथ ध्यानं॥ वक्षोभांकस्थितां देवीं ध्यायेहं विश्वपालिनीं॥
दक्षभागस्थ वाकु(?)भ्यां मक्षस्त्रक्पुपरपुस्तकं॥ बिभ्रतीं वा
महोदंडसुगमस्थं मृगपुस्तकं॥ इति ध्यात्वा ॐ नम इति
दक्षिणपादगुल्फमारभ्य जानुपर्यंतं यथास्थानं यथासं
ख्यत्वेन न्यसेदिति स्थितिमातृका॥ अथ संहारमातृ ॥१२॥

का न्यासः॥ सपत्नसंहारणी शारदादेवतायै नमः॥ अ
न्यच्च षडंगानि पूर्ववत्॥ अथ ध्यानं॥ रक्तांभोजमुरवे
वराक्षवलये दक्षोर्ध्वनी च स्थयो बाह्वोः संदधतीं तथे
तरगयोः सारंगविषलंपुस्तकं॥ अर्धेंदुं शिरसा कुचद्वय
नतां नीलाब्जनेत्रत्रयां वाग्देवीमरुणारविंदनिलयां
वंदे रिसंहारिणीं॥ इति ध्यात्वा यथास्थाने विलोमतः पू
मिति बिंदुं कृत्वा सर्ववर्णान्न्यसेदिति संहारमातृकान्यासः॥
पुनः पूर्ववत्सृष्टिस्थितिमातृकान्यासौ कुर्यादिति पंचवि
धमातृकान्यासः॥ अथ केशवादिमातृकान्यासः॥
ॐ अस्य श्रीकेशवादिमातृकामंत्रस्य प्रसाध्य
नारायण ऋषये नमः शिरसि॥ अमृता गायत्री छं

॥१०॥

द्सेनमः मुखे॥ श्री लक्ष्मीनारायणो देवता ये० हृदये॥ श्री
लक्षप्रीत्यर्थं कृष्ण मंत्रांगत्वेन केशवादिमातृकान्या
से विनियोगः॥ अथ षडंग न्यासः॥ ॐ ह्रीं अंगुष्ठाभ्यां०
श्रीं तर्जनीभ्यां० क्लीं मध्यमाभ्यां० ह्रीं अनामिकाभ्यां० श्रीं
कनिष्ठिकाभ्यां० क्लीं करतलकरपृष्ठाभ्यां० एवं हृदया
दिन्यासः॥ अथ ध्यानं॥ येकतोधननीलाभमेकत
श्चपलाद्युतिं॥ शंखचक्रगदापद्मकुंभादर्शाब्ज
पुस्तकं॥ यथा संख्येन दधतं दक्षवामस्थबाहुभिः॥
पीतांबरधरं देवं वंदे स्त्रीपुरुषाकृतिं॥ इति ध्यानं॥ ॥
मातृकास्थानेषु न्यसेत्॥ यथा॥ ॐ ह्रीं श्रीं क्लीं अं
श्रीं ह्रीं केशवकीर्तिभ्यां नमः शिरसी सा दिश्री ॥१०॥

ओं ३ नारायणकांतिभ्यां० ४ इं ३ माधवतुष्टिभ्यां० ४ ईं ३ गो
विंदपुष्टिभ्यां० ४ उं ३ विष्णुधृतिभ्यां ४ ऊं ३ मधुसूदनशां
तिभ्यां ४ ऋं ३ त्रिविक्रमक्रियाभ्यां० ४ ॠं ३ वामनदयाभ्यां० ४
लृं ३ श्रीधरमेधाभ्यां० ४ लॄं ३ हृषीकेशहर्षाभ्यां० ४ एं
पद्मनाभश्रद्धाभ्यां० ४ ऐं ३ दामोदरलज्जाभ्यां० ४ ॐ ३ वासु
देवलक्ष्मीभ्यां० ४ औं ३ संकर्षणसरस्वतीभ्यां० ४ अं ३ प्रद्यु
म्नप्रीतिभ्यां० ४ अः ३ अनिरुद्धरतिभ्यां० ४ कं ३ पुरुषो
त्तम चक्रीजयाभ्यां० ४ खं ३ अधोक्षजगदीदुर्गाभ्यां०
४ गं ३ नारसिंहशार्ङ्गिप्रियाभ्यां० ४ घं ३ खड्गीसत्याभ्यां० अच्युत
४ ङं ३ जनार्दनशंखीचंडाभ्यां० ४ चं ३ उपेंद्र हली वाणी
भ्यां० ४ छं ३ हरी मुसली विलासिनीभ्यां० ४ जं ३ कृष्ण
शूली विजयाभ्यां० झं ३ विष्णु पाशी विरजाभ्यां०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४अं ३ अं कुशी विश्वाभ्यां०४टं ३ स्तु कुंद विनदाभ्यां०४ठं ३
नंदजस्तुनंदाभ्यां०४डं ३ नंदीस्मरलाभ्यां०४ढं ३ नरकजि
भ्यां०४णं ३ नरकजित्स्वजिभ्यां०४तं ३ हरिशुद्धिभ्यां०
४थं ३ कृष्णबुद्धिभ्यां०४दं ३ सत्यतुष्टिभ्यां०४धं ३ सा
त्वतमतिभ्यां०४नं ३ शौरिक्षमाभ्यां०पं ३ शूररमाभ्यां०४
फं ३ जनार्दनउमाभ्यां०४बं ३ भूधरक्लेदिनीभ्यां०४भं ३
विश्वमूर्त्तिक्लिन्नाभ्यां०४मं ३ वैकुंठवसुधाभ्यां०४यं ३ त्व
गात्मभ्यां पुरुषोत्तमवसुदाभ्यां०४रं ३ असृगात्मभ्यां बली
पराभ्यां०४लं ३ मांसात्मभ्यां०४ बलानुजपरायणाभ्यां
४वं ३ मेदात्मभ्यां बालसूक्ष्माभ्यां०४शं ३ अस्थ्यात्मभ्यां
वृषघ्नसंध्याभ्यां०४षं ३ मज्जात्मभ्यां वृषप्रभाभ्यां०४
सं ३ शुक्रात्मभ्यां हंसप्रभाभ्यां०४हं ३ प्राणात्मभ्यां ।।१३।।

वाराहप्रांनिशाभ्यां०४क्षं जीवात्मभ्यां विमलेमोघाभ्यां०४क्षं ३ क्रोधा
त्मभ्यां नृसिंहविद्युभ्यां०।। इति केशवादिमातृका।। अथ मलाक्षर
न्यासः।। अं नमः शिरसि। कं ललाटे। खं भ्रूमध्ये। पं दक्षिणकर्णे।
गं वामकर्णे। घं दक्षिणनेत्रे। ङं वामनेत्रे। चं दक्षिणनासापुटे।
छं वामनासापुटे। जं मुखे। झं ग्रीवायां। ञं हृदये। टं नाभौ। ठं
लिंगे। डं दक्षिणकट्यां। ढं वामकट्यां। णं जान्वोः। तं पाद
योः।। इत्यक्षरन्यासः।। अथ मंडूकादिन्यासः।। मं मंडूकाय नमः आधा
रे। कालाग्निरुद्राय० स्वाधिष्ठाने।। ॐ आधारशक्त्यै० नाभौ। ॐ
कूर्मा० धरायै० सुधाब्धिपूर्वे० श्वेतद्वीपाय० मणिगृहा० हेमपी
ठाय० हृदये। धर्मो० दक्षांसे। ज्ञानाय० वामांसे। वैराग्या० वामोरौ
ऐश्वर्या० दक्षोरौ। अधर्मा० मुखे। अज्ञाना० वामपार्श्वे। अवैरा
ग्या० नाभौ। अनैश्वर्या० दक्षिणपार्श्वे। अनंता० हृन्मध्ये। तत्त्वा
वआनंदकंदाय० संविन्नालाय० तत्वपद्माय० प्रकृतिपत्रेभ्यो०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९२॥

विकारमयकेसरेभ्यो॰पंचाशद्वर्णकर्णिकायै॰द्वादशकलात्मने सूर्यमंडलाय॰षोडशकलात्मने वह्निमंडलाय॰संसत्वाय॰तंतमसे॰अं आत्मने॰अं अंतरात्मने॰पं परमात्मने॰ह्रीं ज्ञानात्मने॰ममायामूलत्वाय॰कंकलातत्वा॰विं विद्यातत्वा॰अंछ हिंकुचिमूलायै॰उत्कर्षिण्यै॰ज्ञानायै॰क्रियायै॰योगायै॰प्रव्हे॰सत्यायै॰अनुग्रहायै॰ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नमः॥मध्ये इति पीठन्यासः॥

॥९२॥

अथमंत्रन्यासः॥अस्य अष्टादशाक्षर कृष्णमंत्रस्य नारदाय ऋषये नमः शिरसि॥गायत्री छंदसे नमः मुखे॥श्रीकृष्णो देवतायै नमः हृदये॥क्लीं बीजाय नमः गुह्ये स्वाहा शक्तये नमः पादयोः॥श्रीकृष्णाय कीलकाय नमः सर्वांगे॥मम समस्त पापक्षयद्वारा श्रीकृष्ण प्रसादसिध्यर्थं जपे॰इत्यष्यादि॥अथ पंचांगं॥क्लीं कृष्णाय अंगु॰गोविंदाय तर्ज॰गोपीजन मध्यमा॰वल्लभाय अनामिका॰स्वाहा करतल करपृष्ठाभ्यां॰॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३॥

क्लीं कृष्णाय हृदयाय नमः॥ गोविंदाय शिरसे स्वाहा॥
अंगुष्ठप्रसारिततर्जन्यादिचतुष्टयेन × तथैव ॥
गोपीजनशिखायै वषट्॥ अंगुष्ठहीनमुष्टिना॥ वल्लु
भाय कवचाय हुं॥ स्कंधावारभ्य नाभ्यांतं दशांगुली
भिः॥ स्वाहा अस्त्राय फट्॥ प्रसारितांगुलिनाहस्त
द्वयेन॥ ततः समस्तमूलेन मूर्द्धादिपादांतं त्रिर्व्या
पकं॥ इति मूलन्यासः॥ ततः वक्ष्यमाणप्रकारेण
श्रीकृष्णमूर्तिं ध्यायेत्॥ अथांतर्यजनं॥ यथा मूलं

॥१३॥

धाराधरविलसच्छरीरांतवर्तितत्तच्चक्राधिष्ठाननेतृदे
वतादिसकलप्रपंचाधिष्ठानकोटिसूर्यप्रकाशस्वके तीऽ
वविद्याप्रवर्तकश्रीगुरुस्वरूपिणमानंदघनं स्वकी
यशक्तिसहितं सहस्रदलांतर्विहारिणं श्रीकृष्णप
रमात्मानमात्माभेदेन ध्यात्वा पूर्ववन्मानसोपचारैः
संपूज्यार्घ्यादिभिः शिरस्यात्मानमभ्युक्ष्य चिंतात
वैश्वदेवं कुर्यात्॥ यथा स्वाधिष्ठानगते कुंडे त्रिकोणे
प्रणवेन च॥ चिद्रूपवह्निसंस्थाप्य तत्राहंतादिकं ह
विः॥ मन एव स्रुवः प्रोक्तो सुषुम्नास्रुग्गुदीरिता॥ मूलं
अहंतामहं जुहोमि॥ असत्यमहं जुहोमि॥ पैशून्यमहं०

॥१४

॥१५८॥

कामममहंजुहोमि ॥ क्रोधमहं० ॥ लोभमहं० मदमहं० मो
हमहं० मात्सर्यमहं० ॥ इतिजुत्वासहस्त्रंत्रिशतंशतंयथा
शक्त्यावामकर्णे अजप्यवक्ष्यमाणमंत्रेणजपंनिवेदयं
त्रैमस्तैर्वाबहिर्यजनंकुर्यात् ॥ प्रसंगादत्रयंत्रोद्धारमा
ह ॥ यथाबिंदुगर्भितषट्कोणपद्ममष्टदलद्वयंततः भू
गृहंगुणरेखाभिश्चतुर्द्वारोपशोभितं ॥ यंत्रमेतन्मनो
हारिकृष्णस्यपरमात्मनः ॥ दर्शनात्सर्वपापघ्नंकाम
दंकिमुतार्चनात् ॥ अथपात्रस्थापनं ॥ स्ववामेपृथ्वी
मंत्रेणपृथ्वींसंस्पृश्यतत्रस्वशाखोक्तमंत्रेणकलशंप्रति ॥१५८॥

ष्ठाप्यवारुणैर्मंत्रैस्तत्रोदकमापूर्यगंधादिभिःपूजयित्वक
लशस्थापनं ॥ अथविशेषार्घ्यस्थापनं ॥ कलशाद्दक्षि
णतः अष्टगंधादिनात्रिकोणषट्कोणवृत्तचतुरस्त्रम
डलंकृत्वागंधाष्टकमाह ॥ शीरसन्निकेः ॥ चंदनागरुकर्पूरकु
ष्ठकुष्ठकुंकुमसेव्यकाः ॥ जटामांसीमुरमितिविष्णोर्गंधा
ष्टकंविदुः ॥ शंखमुद्रयातत्संपृष्टंभ्यार्चिततादिभिस्तत्राग्न्या
दिस्वमंत्रांगानिसंपूज्यफडित्याधारंप्रक्षाल्यमंवह्निम
डलायदशकलात्मनेविशेषार्घ्यपात्रासनायनमइत्याधा
रमंडलोपरिसंस्थाप्यतत्रआगादिक्रमेणवह्नेर्दशक
लाःपूजयेत् ॥ यंधूम्रार्चिषे० रंनीलवर्णायै० लंकपिला
यै० वंविस्फुलिंगिन्यै० शंज्वालायै० षंहैमवत्यै० संकव्य
वाहिन्यै० हंहव्यवाहिन्यै० क्षंरौद्र्यै० क्षंसंकर्षिण्यै० इ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥

तिसंपूज्य ॐ क्लीं महाजलचराय हुं फट् स्वाहा ॥ पांच
जन्याय नमः इति शंखं प्रक्षाल्य अं सूर्यमंडलाय द्वादश
कलात्मने विशेषार्घ्यपात्राय नमः इति तस्मिन्नाधारे स्थापयेत्
तत्र सूर्यस्य द्वादश कलाः पूजयेत् ॥ कं भं तपिन्यै नमः ॥
खं बं तापिन्यै० गं फं विबुध्यायै० घं पं बोधिन्यै० ङं नं ज्वालि
न्यै० चं धं शोषिण्यै० छं दं वारुण्यै० जं थं आकर्षिण्यै० झं
तं मायायै० ञं णं विश्वावत्यै० टं ढं हेम्यै० ठं डं प्रभायै० ॥
इति संपूज्य विलोमेन मातृकामूलेन पूरयेत् तत्र जलमा
पूर्य उं सोममंडलाय षोडशकलात्मने विशेषार्घ्यामृ
तायनमः इति तत्र चंद्रस्य षोडशकलाः पूजयेत् ॥ अं
अमृतायै नमः ॥ आं मानदायै० इं पूषायै० ईं तुष्ट्यै० उं

॥१८॥

पुष्ट्यै० ऊं रत्यै० ऋं धृत्यै० ॠं शशिन्यै० ऌं चं
द्रिकायै० ॡं कान्त्यै० एं ज्योत्स्नायै० ऐं श्रियै० ओं प्रीत्यै
यै० औं अंगदायै० अं पूर्णायै० अः पूर्णामृतायै० इति सं
पूज्य गंगे चेति मंत्रेण अंकुशमुद्रया सवितृमंड
लात्तीर्थानि स्वहृदयाच्च तत्र श्रीकृष्णमावाह्य जलं स्पृ
ष्ट्वाष्टवारं मूलं जप्त्वा जले गात्राणि विन्यस्य नमः इति गंधा
दिभिः संपूज्य पुनर्मूलमष्टधा जपेन् मच्छमुद्रयाच्छाद्य
स्त्राय फडिति छोटिकया संरक्ष्य अवगुंठिन्या हुमिति
वगुंठ्य धेनुमुद्रया वमिति अमृतीकृत्य संरोधिन्या सं
रुध्य तत्र शंखमौसलचक्रयोनिमुद्रा महामुद्रा
गालिनीगारुडमुद्राः प्रदर्शयेदिति विशेषार्घ्यः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६८॥

ततस्तद्दक्षिणतः प्रोक्षणीपात्रं विशेषार्घ्योदकेन पूर
यित्॥ ततः प्रोक्षणी चोत्तरतः पाद्यादीनि पात्राणि स्थाप
येत्॥ यथा॥ पूर्ववन्मंडलं विधाय मंवह्निमंडलाय द
शकलात्मने कुच्छपाद्यपात्रासनाय नमः इत्याधारं प्र
गवत्प्रतिष्ठाप्य तत्र पूर्ववद्वह्निकलाः संपूज्य पूजिति
पात्रं प्रक्षाल्य अं सूर्यमंडलाय द्वादशकलात्मने कु
च्छपाद्यपात्राय नमः इत्याधारे स्थाप्य तत्र पूर्ववत्सूर्य
कलाः संपूज्य मूलेन तत्र कलशोदकमापूर्य उं सोममं
डलाय षोडशकलात्मने पाद्यपात्रामृताय नमः इति तत्र
पूर्ववच्चंद्रकलाः संपूज्य गंगे च इति मंत्रेण क्रोमित्यंकु
शमुद्रया सूर्यमंडलात् तीर्थान्यावाह्य नमः इति गंधा ॥६८॥

दिभिः संपूज्य एवमिति धेनुमुद्रयामृतीकुर्यादिति पाद्यपात्र
स्थापनं॥ एवमन्यत्पात्रत्रयं स्थापयेत्॥ ततः पाद्यपात्रे जलं
श्यामाकविष्णुक्रांताब्ज दूर्वाः क्षिपेत्॥ अर्घ्यपा०॥ गंधपुष्पा
क्षतयवकुश तिलसर्षपान्॥ आचम०॥ लवंगजातिपत्र
फल कंकोलान्॥ मधुपर्कपा० दध्याज्य मधूनि॥ इति पा
त्रस्थापनं॥ ततः प्रोक्षण्युदकेन मूलं गायत्रीं वा जपन्
आत्मानं पूजासंभारांश्च प्रोक्षयेत्॥ अथ बहिर्यजनं॥
यथा प्रोक्षण्युदकेन पीठं संप्रोक्ष्य॥ हस्ते अक्षतान् गृही
त्वा पीठं पूजयेत्॥ यथा मध्ये॥ ॐ मं मंडूकाय० ॐ कालाग्नि
रुद्राय० ॐ आधारशक्तये० कूर्माय० अनंताय० पृथ्व्यै०
क्षीरसागराय० श्वेतद्वीपाय० कल्पवृक्षाय० तदधः॥
मणिगृहाय० तत्र स्वर्णमयपीठाय० ॐ धर्माय० ज्ञान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं ज्ञानाय० नैर्ऋत्यां॥ वैराग्याय० वायव्यां॥ ऐश्वर्याय० ई
शान्यां॥ ॐ अधर्माय०॥ पूर्वस्यां॥ अज्ञानाय० दक्षिणस्यां॥
अवैराग्या० वारुण्यां॥ अनैश्वर्याय० उत्तरस्यां॥ धर्माय०
मध्ये आनंदकंदाय० संविन्नालाय० सत्वमयपद्माय०
प्रकृतिमयपत्रेभ्यो० विकारमयकेसरेभ्यो० पंचाश
द्वर्णकर्णिकायै० द्वादशकलात्मने सूर्यमंडलाय०
षोडशकलात्मने सोममंडलाय० दशकलात्मने वह्नि
मंडलाय॥ तत्रैव सं सत्वाय० रं रजसे० तं तमसे० आं आ
त्मने० अं अंतरात्मने० पं परमात्मने० ह्रीं ज्ञानात्मने० मं
मायातत्वाय० कं कलातत्वाय० विं विद्यातत्वाय० पं पर
तत्वाय० ततोष्टदिक्षु॥ विं विमलायै० उत्कर्षिण्यै०

ज्ञां ज्ञानायै० क्रिं क्रियायै० यों योगायै० प्रं प्रह्व्यै० सं सत्यायै०
ईं ईशितायै० अं अनुग्रहायै० मध्ये ॐ नमो भगवते स
र्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने न
मः॥ इति पीठपूजा॥ ततः मूलमुच्चार्य जलं पुष्पं गृही
त्वा मूलाधारात्कुंडलिनीमुत्थाप्य ब्रह्मरंध्रे नीत्वा परमा
त्मनि संयोज्य तत्तेजो वह्नौ नासापुटमार्गेण जलं संयो
जयित्वा यंत्रे मूर्त्यां वा योजयित्वा॥ आत्मसंस्थमजं शु
द्धं त्वामहं परमेश्वर॥ अरण्यामिव हव्याशं मूर्तावावाह
याम्यहं॥ सहस्रशीर्षेत्यावाहनं॥ आवाहनीमुद्रां दर्श
यित्वा॥ पूर्ववत्प्राणप्रतिष्ठां कृत्वा ध्यायेत्॥ ध्यानं॥ स्म
रेद्वृंदावने रम्ये मोहयंतमनारतं॥ गोविंदं पुंडरीका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥

॥१॥

क्षं गोपकन्याः सहस्रशः॥ आत्मनावदनांभोजप्रेषिताक्षि
मधुव्रताः॥ पीडिताः कामबाणेन चिरमाश्लेषणोत्सुकाः॥२॥
मुक्ताहारलसत्पीनतुंगस्तनभरानताः॥ स्रस्तधम्मि
ल्लवसनामदस्खलितभाषणाः॥ शंदलपंक्तिप्रभोभ्दा
सिस्पंदमानाधरांचिताः॥ विलोभयंती विविधैर्विभ्र
मैर्भ्रूविगर्भितैः॥४॥ फुल्लेंदीवरकांतिमिंदुवदनं बर्हा
वतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुं
दरं॥ गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं
गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे॥५॥ इति
ध्यानं॥ मूलं॥ देवेशभक्तिसुलभ निजावरणसंयुत॥
यावत्वां पूजयाम्यत्र तावत्वं सन्निधौ भव॥ स्थापनीमु
द्रां प्रदर्शयेत्॥ मूलं॥ अनन्यतव देवेश मूर्तिशक्ति ॥१८॥

रियं प्रभो॥ सांनिध्यमस्यां कुरु भो तं भक्तजनवत्सल॥ स
न्निधापिनीमुद्रां॥ मूलं॥ आज्ञया तव देवेश कृपापूरित
मानस॥ आत्मानं देवरूपत्वां निरुंधि शिवप्रिय॥ सन्नि
रोधिनीमुद्रां॥ मूलं॥ सर्वत्र सर्वव्यापी च जगन्नाथ सच्चि
दानंदलक्षण॥ मद्भक्तमात्मनिमिद मत्रं त्वं सुस्थिरो भव॥
पुरुषएवेत्यासनं॥ अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधन
स्य च॥ यदपूर्णं भवेत्कृत्यं तत्राप्यभिमुखो भव॥ संमुखी
मुद्रां॥ दृशा पीयूषवर्षिण्या मां विलोकय भो प्रभो॥ पूजा
मङ्गस्य संसिद्धिं कुरु देवकीनंदन॥ प्रार्थनामुद्रां॥ ततो दे
वतांगे षडंगं कुर्यात्॥ इदं सकलीकरणं॥ अमृतवाक्येन धे
नुं श्रोत्रे हृद्यंगुष्ठमुद्रां॥ स्वतेजःपंजरेणावंवेष्टितोसिस्म
तान वा॥ अवगुंठनमुद्रां॥ ततः अमृतीकरणी परमी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ कुरुणं महामुक्तां च दर्शयेत् ॥ यस्य दर्शनमिच्छंति देवाः स्वा
भीष्टसिद्धये ॥ तस्मै ते देवदेवेश स्वागतं किं रमापते ॥ इति
स्वागतं ॥ त्रिमार्गैर्भृतैः पूतपात्रपाद्येन किं तव ॥ तथा
पि दीयते भक्त्या मयैतत्प्रतिगृह्यतां ॥ श्रीकृष्णाय नम
इति सर्वत्र ॥ एतावानस्येति पादयोः पाद्यं ॥ वेदवेद्य रमाधी
शानंद गोपसुखप्रद ॥ ददाम्यर्घ्यमहं भक्त्या गृहाणार्घ्य
प्रदक्ष्य ॥ त्रिपादूर्ध्व इति मूर्ध्नि अर्घ्यं स० ॥ वेदवेद्याय देवा
य सर्वदेवस्वरूपिणे ॥ दीयते ते विशुद्धाय गृहाणाचम
नीयकं ॥ तस्माद्विराळिति मुखे आचमनीयं स० ॥ सुखा
मृते निर्मलाय मुकुंदज्योतिरूपिणे ॥ दत्तोयं मधुप
र्कस्ते मया मुकुंद गृहाण भो ॥ श्रीकृष्णाय० मुखे मधुप ॥१२॥

र्कं स्नानं स० ॥ पुनराचमनीयं ते दीयते भक्तितो मया ॥ गृ
हाण देव जगन्नाथ कृपया परया हरे ॥ पुनः पूर्ववदाचम०
ततः आप्यायस्वेति पयस्नानं ॥ दधिक्राव्णेति दधि घृ
तं मिमिक्षेति घृतं ॥ मधुवातेति मधु ॥ स्वादुः पवस्वेति
शर्करा ॥ अथाभ्यंगः ॥ सुगंधतैलेन करोमि ते हमभ्यंग
मंभोरुहपत्रनेत्र ॥ संपादितेनांग गृहाण भक्त्या सुदात्त
मेनं विहगेशपत्र ॥ इत्यभ्यंगः ॥ नवनीरदभासमानदि
व्यो नवपाटीरसुखाद्यवस्तुना हं ॥ केलयामि तवांग
मंग भक्त्या तु मिदं स्वीकुरु मत्प्रसादतु ध्या ॥ इत्युद्व
र्तनं ॥ उष्णांबुना स्नाहि रमाकलत्र संपादितेनात्र म
या परत्र ॥ शर्मप्रदोसि खिलमनन्यभाजां प्रेम्णा निशंपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥

वनसञ्चरित्र ॥ इत्युष्णोदकस्नानं ॥ रमेशानैजनामतः
समस्ततीर्थमज्जनेन यद्स्तितद्वत्तसिभोफलं किमस्ति
मज्जने ॥ प्रयोजनं तव प्रभो तथाप्यनेन वारिणा विध्री
यतां हि मज्जनं त्वया मम प्रियार्थिना ॥ इति मंत्रं पठित्वा
घण्टावादनपूर्वकं श्रीकृष्णपरमात्मानं यत्पुरुषेणेति
पौरुषेण सूक्तेन स्नापयेत् ॥ स्नाने वस्त्रोपवीतांतेने
वेद्यांते पितत्सम्भूतमिति वचनात्स्नानांते पुनराचमनी
यं ॥ निरावरणगोपते कथमिदं पिधातुं क्षमं भवेद्व
सनमल्पकं सकललोकभूजन्मनः ॥ कटिं तवतथा
प्यहं पुरुषर्षवर्य लक्ष्मीपते ददामि हृद भुक्तितस्त्व
मिदं मतदंगी कुरु ॥ तं यज्ञमिति वस्त्रं ॥ पुनराच ॥२०॥

मनीयं ॥ त्वदाश्रयत्वादियमस्य जातु मायापिधानाय
हरे समर्था ॥ विश्वस्पते किं पटुवस्त्रमेतत्तथापि गृह्णा
यतां तु पिधातुं ॥ उत्तरीयवस्त्रं ॥ आचमनीयं ॥ यज्ञोप
वीतं त्वमिदं गृहाण मयार्पितं यज्ञपवास्तुदेव ॥ पाथ्य
थितोयद्यपि निर्गुणोसितथापि भक्तप्रियताभिमाना
त् ॥ तस्माद्यज्ञांशसर्वहूतः संभृतमिति यज्ञोपवीतं ॥
पुनराचमनं ॥ किं ते कौस्तुभभूषणस्य भगवन्यो
ग्यं हरे भूषणं ॥ नानारत्नसुवर्णसंभवमिदं ना
नाविध्यं मत्कृतं ॥ इत्थं चिंत्यमयाति भक्तिभर
तो ग्राह्यं त्वया दीयते दीपः स्वल्पतरो यथा हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रविणा भक्त्यार्पितो गृह्यते ॥ अलंकारं० ॥ चंदनाग
रिवलवस्तुसुगंधंवेष्ठवेजितसमस्तसुगंधं ॥ गंध
मेनमम लांग गृह्णाण त्वं मयार्पितमहासुराणि ॥ त
स्मा पूर्शी सर्वकृतत्र चः सामानीति गंधं ॥ गंधमुद्रां
प्रदर्शयेत् ॥ कनिष्ठांगुष्ठयोगो भवेद् गंधमुद्रा ॥ सुगंधि
सुक्ष्मामृतलडुलानीलमक्षतान्देव गृह्णाण वृक्षा ॥ म
यार्पिता नोच्च वकुंकुमेन सुरजितान्न क्षतरूपभक्त्या ॥
अक्षतान्० ॥ मालती बकुलं चंपकं जातीपाटला चि
भानितानि सुमानि ॥ अर्पितानि परयातव भक्त्या
लंगृह्णाण पुरुषोत्तम विष्णो ॥ तस्माद् श्वाअजा
यंते लिपुष्पं स० पुष्पमुद्रां प्रदर्शयेत ॥ तर्जन्यंगुष्ठयोग
पुष्पमुद्रा ॥

अथावरणार्चनं ॥ पुष्पपुजां विधायेत्थं कुर्यादावरणा
र्चनमिसुक्तेः ॥ हृदयाय नमः हृदयदेवतां पूजयामीत्य
ग्निकोणे ॥ ४ शिरसे स्वाहा शिरोदेवतां पू० ईशाकोणे
॥ शिखायै वषट् शिखादेवतां पू० असुरकोणे वल्लभा
य कवचाय हुं कवचदेवतां पू० वायव्यां अस्त्राय फट् अ
स्त्रदेवतां पू० चतुर्दिक्षु ॥ हस्ते अस्तं ता गृहीला ॥ अभी
ष्टसिद्धिं मे देहि० प्रथमावरणार्चनं ॥ इति प्रथमावर
णं ॥ प्रथमाष्टदले प्रागादिक्रमेण ॥ ॐ कालिंद्यै नमः
कालिंदीं पूजयामि ॥ नाग्नजित्यै नम० नाग्नजितिं पूजया

॥२२॥

मीतिसर्वत्र॥मित्रविंदायै॰ चारुहिस्निन्यै॰ रोहि
ण्यै॰ जांबवत्यै॰ रुक्मिण्यै॰ सत्यभामायै॰ सत्य
भामांपू॰ अभीष्टसिद्धिं॰ विशेषार्घ्योदकेन सर्व
त्रसमर्पणं॥इतिद्वितीयावरणं॥द्वितीयाष्टदले
तथैव। ॐ ऐरावताय॰ ऐरावतंपूजयामीतिसर्वत्र
पुंडरीकाय॰ पुंडरीकंपू॰ वामनाय॰ कुमुदाय॰ अंज
नाय॰ पुष्पदंता॰ सार्वभौमाय॰ सुप्रतीकाय॰ सु
प्रतीकंपू॰॥अभीष्टसिद्धिं॰ तृतीयावरणं॥भूगृह
स्यप्रथवीथ्यांप्रागादिक्रमेणयथा॥लं इंद्राय॰

॥२२॥

इंद्रंपू॰ रं वह्नये॰ यं यमाय॰ क्षं निर्ऋतये॰ वं वरुणा
य॰ यं वायवे॰ ऐं कुबेराय॰ हौं ईशानाय॰ ईंद्रेशान
योर्मध्ये ऊर्ध्वे ब्रह्मणे॰ निर्ऋतिवरुणयोर्मध्ये अधः
अनंताय॰ अनंतंपू॰ इतिसंपूज्य अभीष्टसिद्धिं॰ इ
तिचतुर्थावरणं॥द्वितीयवीथ्यांतत्पुरतः वंवज्रा
य॰ शंशक्तये॰ दंदंडा॰ खंखड्गा॰ पंपाशाय॰ अंअं
कुशा॰ गंगदायै॰ त्रिंत्रिशूलाय॰ पंपद्माय॰ चं
चक्राय॰ इतिसंपूज्य अभीष्ट॰ इतिपंचमावरणं
॥प्रत्यावरणे गंधादिपुष्पांतं संपूज्यावरणार्चेदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वायसमर्पयेत् करप्रक्षाल्लनंप्र सावरणे॥ इत्यावर
णार्चां विधाय धूपं समर्पयेत् धूपपात्रस्थितांगारे धू
पद्रव्यं क्षिप्त्वा अस्त्राय फडिति तत्पात्रं प्रोक्ष्य नमः
इति तत्र पुष्पं समर्प्य वामतर्जन्या तत्पात्रं स्पृष्ट्वा यजगंध
निमंच मातः स्वाहेति घंटां संपूज्य म्लांते॥ गुग्गु
लाघखिल्लवस्तु भुवं वं धूपमेनं मथिनंद कुमार॥
आघ्राण रूपयातिसुगंध गंधत्तः परिहृत्य खि
ल गंधं॥ यस्सुरु षंव्यदधुरिति धूपा कीर्तनपूर्वकं
वामहस्तेन घंटं वादयन् सांगोपसावरणायश्री

कृष्णाय नमः॥ धूपं समर्पयामीति दक्षिणहस्तेन नाभि
देशे धूपं समर्प्य शंखोदकमुत्सृज्य धूपमुद्रां प्रदर्शयेत्॥
तर्जन्यंगुष्ठयोगो धूपमुद्रा॥ ततः प्रोक्षण्युदकेन हस्त
प्रक्षालनं॥ इति धूपः॥ अथ दीपः॥ दीपं प्रज्वाल्य अस्त्रा
य फडिति सारभ्य सर्वं पूर्ववत्॥ म्लांते॥ अविवर्त्तिसुकल्प
तदीपमेनं मयार्पितं सर्वगतप्रकाशा॥ विलोकयतं प
रमप्रकाशं स्वकीय भक्तप्रियताभिमानात्॥ आलो
णोस्येति श्रीकृष्णाय॥ नेत्रदेशे दीपं॥ दीपमुद्रां॥ म
ध्यमांगुष्ठयोगो दीपमुद्रा॥ अन्यसर्वं समानं॥ अथ
नैवेद्यं पथादिवस्य पुरतः॥ प्रोक्षण्युदकेन चतुरस्र
मंडलमालिख्य तत्राधारे नैवेद्यपात्रं प्रतिष्ठाप्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रापफडिस्यभिमंत्रितेनशंखतोदकेनप्रोक्ष्यचक्रमुद्रां
संदर्श्यपूमितिद्वादशवारमभिमंत्रितेजलेस्तनेव
संपुनःपूर्ववत्प्रोक्ष्यतद्दीयंमारुतेस्तद्दोषसंशोष्यरंबीजो
दक्षिणकरेरंबीजंविचिंत्यतलस्थंवह्नीमुकरतलंत्वाने
वेद्यमदर्श्याग्निबीजोत्थाग्निनाखिलंनैवेद्यदोषंसंद
ह्यवामकरेवंबीजंध्यात्वातत्स्थदक्षिणहस्तदत्वातत्र
प्रदर्श्यवंमृतबीजोत्थामृतेनाप्लुतंध्यात्वामूलेनप्रोक्ष्य
तस्योपर्यष्टवारंमूलंप्रजप्यधेनुमुद्रांप्रदर्श्यगंधपुष्पैःस
दभ्यर्च्यदेवंपुष्पांजलिंदत्वादेवास्याज्ञांतत्तेजःसंध्यात्वावा
मांगुष्ठेननैवेद्यभाजनंसंस्पृश्यदक्षिणहस्तेनजलंदत्वा
मूलांतेसाधारहेमपात्रेस्मिन्परिवेषितेमादराद्दिय ॥श्री

स्वादुलिप्तंस्वादुहरिपीतस्रूपकं ॥ अतिमुक्तसुगंधा
ढ्यासिक्तभक्तविराजितं ॥ हिंगादिमिश्रवटकैःसुसितंप
यसान्वितं ॥ घारिकापूरिकासुत्कपूर्णचंद्राभपूपिका ॥ सा
पूपमंडकंस्वादुशाष्कुलीपरिरंजितं ॥ आज्याज्यपुग्धक
थिकादधिक्षीरैःसुपूरितैः ॥ चषकैःसंयुतंनानाचोष्यैःस्वा
द्यैःसमन्वितं ॥ यथाशक्त्योपार्जितैरन्यैःपदार्थैःपरिकल्पि
तं ॥ भक्ष्याग्ररसाण्णंनैवेद्यंमयादत्तमनेकधा ॥ निसत्वत्त
जगन्नाथत्वमन्नंतनमोस्तुते ॥ स्वभक्तप्रियताहेतोःकृपया
परयाविभो ॥ सांगायसावरणायश्रीकृष्णायनैवेद्यंसम
र्पयामीतिशंखोदकमुत्सृज्यांगुष्ठानामिकाभ्यांनैवेद्यमु
द्रांप्रदर्श्यसपुष्पाभ्यांकराभ्यांनैवेद्यपात्रंशिरसित्रिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुच्चयमुनराधारे संस्थाप्य॥ निवेदयामि भवते जुषाणे
दं हविर्हरे इति षोडशार्णमंत्रेण वामहस्तेन पद्माभां मुद्रां
कृत्वा दक्षिणहस्तेन प्राणादिमुद्राभिः ॐ प्राणाय स्वाहेति पं
च ग्रासान् ग्राहयेत्॥ चंद्रमा मनसेति नैवेद्यं॥ कनिष्ठाना
मिकांगुष्ठयोगः प्राणमुद्रा॥ तर्जनीमध्यमांगुष्ठयोगोऽपान
मुद्रा॥ अनामामध्यमांगुष्ठयोगो रुदानमुद्रा॥ तर्जनानामामध्य
मायोगो व्यानमुद्रा॥ सर्वाभिः समानमुद्रा॥ ततः जवनिकां कृ
त्वा॥ अशेषाघैः परितुष्टरूपैः सुपविष्टैः समेतो लक्ष्म्याखिलं ज
गत्सुपकरमाप्ताहरं वीज्यमानः॥ नर्मक्ष्वेलाः सहसनमुखे हो
सयन्पंक्तिभोक्तृभुक्ते पात्रे कनकघटिते षड्रसान् श्रीरमेशः॥
इति पठित्वा श्रीकृष्णं भुंजानं ध्यायन् सप्तधा मूलमंत्रं जप्त्वा जं
वनिकामपाकृत्य ॐ समस्तदेवदेवेश सर्वतृप्तिकरं परं॥
अखंडानंदसंपूर्णं गृहाण जलमुत्तममिति मध्ये पानीयं

श्रीकृष्णाय नम इति समर्पयेत्॥ अथ होमः॥ मथात्र पूर्वापि
च्यायां सपूर्वकमूलन्यासात् कृत्वा कुंडे स्थंडिले वा मूलेनेक्षणं॥
अस्त्राय फडिति प्रोक्षणं तेनैव कुशत्रयेण संताडनं कवचे
नाभ्युक्षणं इति चतुःसंस्कारान् कृत्वा तत्र प्रागग्रा
उदगग्राश्च तस्रो रेखा लिखित्वा कोष्ठानि निर्माय तत्र म
ध्ये नवमकोष्ठे वह्निं प्रतिष्ठाप्य ॐ क्रव्यादेभ्यो हुं फडिति नैर्ऋ
त्यादाशाने क्रव्यांशं त्यक्त्वा मूलेन परिषिंच्य॥ ॐ अग्निं प्रज्व
लितं वदे जातवेदं हुताशनं॥ सुवर्णवर्णममलं समिद्धं वि
श्वतोमुखमिति तं प्रणम्य वैष्णवाग्नये नम इति गंधादिभिः सं
पूज्य तत्र चक्रस्य सांगं सावरणं श्रीकृष्णमावाह्य मूलेन गं
धादिभिः संपूज्य घृतेनान्नेन वा॥ ॐ भूः स्वाहा॥ ॐ भुवः स्वा
हा॥ ॐ स्वः स्वाहा॥ ॐ भूर्भुवः स्वः स्वाहेत्याहुतिचतुष्टयं
न हुत्वा मूलेन पंचविंशतिभिः पुनर्हुत्वा पुनः पूर्ववद्व्याहृति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिर्धृत्वा मूलेन देवे पुष्पांजलिं दत्वा श्रीकृष्णं संपूज्य यंत्रे मूर्तौ
वा विसृज्य मूलेन विंशतिवारं न्यस्त्वा पुनः परिषिच्य वा नि
विसृजेदिति वैश्वदेवः॥ देवाय आचमनीयं दद्यात्॥ ततः देवा
४ र्चनीय चंदनेन करौ दत्वा फलानि समर्पयेत्॥ यथा मूलांते॥ ना
रिकेलफलं सांम्र मुख्यानां यानि यानि मिलितानि फलेषु॥
तानि तानि मधुसूदन गृहाण मम यद्यपि केफलानि॥ श्री
कृष्णा० इमानि फलानि सम०॥ जातीफल लवंगैला पूगीफल ल
वासितं॥ जातीपत्री चंद्र शुद्ध चूर्ण खादिर संयुतं॥ पक्वाहि
लतिका पर्णवीटिकं समरीचिकं॥ मयार्पितं गृहाण त्वं तांबू
लं प्रीतिपूर्वकं॥ नाम्ना श्रीसौहितितांबूलं॥ निरीहस्य परम
शस्य कार्यो दद्यात् दक्षिणा मया॥ तथापि भक्तितो दत्तां गृहाण
दक्षिणां त्वया॥ हिरण्यगर्भेति दक्षिणा॥ मूलांते॥ फणिव

र्यफलाच्छत्रं तव किंशक्तिरस्ति मे॥ दातुं तथापि मद्दत्तं गृहा
णातपवारणं॥ लक्ष्मीरणद्वलयबालतल स्थितेन सेवाज्य
मानसुखवर्यसुचामरेण॥ वीविजालुकेन मनेन पद्मभवाभिभ
वात पापि भगवन्परिवीजयामि॥ श्रीकृ० चामरं॥ मूलं॥ त्रिभु
विवितरूपोस्ति किं तवास्ति विलोकने॥ आदर्शं दर्शयतीरूपं तथा
पि मम भक्तितः॥ श्रीकृ० दर्पणं॥ गीतवाद्यनृत्य॥ वाद्यानि॥ ततः
पूर्ववत् ऋष्यादिन्यासपूर्वकं सहस्रं त्रिशतं शतवा मूलं संज
प्य शंखोदकेन देवस्य दक्षिणकरे जपं निवेदयेत्॥ गुह्यातिगुह्य
गोप्ता त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि
स्थितिः पूर्ववत्॥ जपं समर्प्य पुनर्मूलेन संपूज्यातिगुह्य संस्थाप
यित्वा तिदेवं नीराजयेत्॥ त्रिपंचजातेति॥ ससास्यांसंनिति
चतस्रः प्रदक्षिणाः कृत्वा॥ यज्ञेन यज्ञमयजंतेति पुष्पां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२७॥

जलिंसमर्प्य दंडवत्सांष्टांगं प्रणम्य प्राग्वत्प्रांजलिः स्थि
ता देवं प्रार्थ्यपि विश्वरूपस्तु सहस्रनामाष्टोत्तरशतनामादीनि
पठेत्॥ ततः मूलेन शंखोदकं दत्वा ब्रह्मार्पणमनुना श्री
कृष्णार्पणं कुर्यात्॥ ततो जलाक्षतान्गृहीत्वा परि
वारदेवताः श्रीकृष्णमूर्तौ विसर्जयेत्॥ स्वकीयावरभूष
णेयासु काश्चिद्देवताः॥ श्रीकृष्णस्यांगविलीनास्ताः
संतु सर्वाः सुपूजिताः॥ इति परिवारदेवताः मूर्तौ लीना
विभाव्य पूर्ववद्ध्यादिन्यासपूर्वकं श्रीकृष्णध्यात्वा सं

॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=09.09.19 16:45
,TRANSFERRED=2019/09/09 at 16:51:45
,PAGES=29
,TYPE=STD
,NAME=S0001706
,Book Name=M-2195-SHRI KRISHNACHARYA VIDHIM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection